# विष्णुसहस्रनाम स्तोत्रम् (Viśṇu Sahasranāma Stotram )

विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः। भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः॥ १॥

*viśvaṁ viṣṇurvaṣaṭkāro bhūtabhavyabhavatprabhuḥ | bhūtakṛdbhūtabhṛdbhāvo bhūtātmā bhūtabhāvanaḥ*

पूतात्मा परमात्मा च मुक्तानां परमा गतिः। अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च॥ २॥

*pūtātmā paramātmā ca muktānāṁ paramā gatiḥ |avyayaḥ puruṣaḥ sākṣī kṣetrajño'kṣara eva ca*

योगो योगविदां नेता प्रधानपुरुषेश्वरः। नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः॥ ३॥

*yogo yogavidāṁ netā pradhānapuruṣeśvaraḥ |nārasiṁhavapuḥ śrīmān keśavaḥ puruṣottamaḥ*

सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः। संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः॥ ४॥

*sarvaḥ śarvaḥ śivaḥ sthāṇurbhūtādirnidhiravyayaḥ |sambhavo bhāvano bhartā prabhavaḥ prabhurīśvaraḥ*

स्वयंभूः शम्भुरादित्यः पुष्कराक्षो महास्वनः। अनादिनिधनो धाता विधाता धातुरुत्तमः॥ ५॥

*svayambhūḥ śambhurādityaḥ puṣkarākṣo mahāsvanaḥ |anādinidhano dhātā vidhātā dhāturuttamaḥ*

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः। विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः॥ ६॥

*aprameyo hṛṣīkeśaḥ padmanābho'maraprabhuḥ |viśvakarmā manustvaṣṭā sthaviṣṭhaḥ sthaviro dhruvaḥ*

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः। प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम्॥ ७॥

*agrāhyaḥ śāśvataḥ kṛṣṇo lohitākṣaḥ pratardanaḥ |prabhūtastrikakubdhāma pavitraṁ maṅgalaṁ param*

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः। हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः॥ ८॥

*īśānaḥ prāṇadaḥ prāṇo jyeṣṭhaḥ śreṣṭhaḥ prajāpatiḥ |hiraṇyagarbho bhūgarbho mādhavo madhusūdanaḥ*

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः। अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान्॥ ९॥

*īśvaro vikramī dhanvī medhāvī vikramaḥ kramaḥ |anuttamo durādharṣaḥ kṛtajñaḥ kṛtirātmavān*

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः। अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः॥ १०॥

*sureśaḥ śaraṇaṁ śarma viśvaretāḥ prajābhavaḥ |ahaḥ saṁvatsaro vyālaḥ pratyayaḥ sarvadarśanaḥ*

अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः। वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः॥ ११॥

*ajaḥ sarveśvaraḥ siddhaḥ siddhiḥ sarvādiracyutaḥ |vṛṣākapirameyātmā sarvayogviniḥsṛtaḥ*

वसुर्वसुमनाः सत्यः समात्माऽसम्मितः समः। अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः॥ १२॥

*vasurvasumanāḥ satyaḥ samātmā'sammitaḥ samaḥ |amoghaḥ puṇḍarīkākṣo vṛṣakarmā vṛṣākṛtiḥ*

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः। अमृतः शाश्वत स्थाणुर्वरारोहो महातपाः॥ १३॥

*rudro bahuśirā babhrurviśvayoniḥ śuciśravāḥ |amṛtaḥ śāśvata sthāṇurvarāroho mahātapāḥ*

सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः। वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः॥ १४॥

*sarvagaḥ sarvavidbhānurviṣvakseno janārdanaḥ |vedo vedavidavyaṅgo vedāṅgo vedavit kaviḥ*

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः। चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः॥ १५॥

*lokādhyakṣaḥ surādhyakṣo dharmādhyakṣaḥ kṛtākṛtaḥ |caturātmā*

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः। अनघो विजयो जेता विश्वयोनिः पुनर्वसुः॥ १६॥

उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः। अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः॥ १७॥

*upendro vāmanaḥ prāṁśuramoghaḥ śucirūrjitaḥ |atīndraḥ saṅgrahaḥ sargo dhṛtātmā niyamo yamaḥ*

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः। अतीन्द्रियो महामायो महोत्साहो महाबलः॥ १८॥

*vedyo vaidyaḥ sadāyogī vīrahā mādhavo madhuḥ |atīndriyo mahāmāyo mahotsāho mahābalaḥ*

महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः। अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक्॥ १९॥

*mahābuddhirmahāvīryo mahāśaktirmahādyutiḥ |anirdeśyavapuḥ śrīmānameyātmā mahādridhṛk*

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः। अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः॥ २०॥

*maheṣvāso mahībhartā śrīnivāsaḥ satāṁ gatiḥ |aniruddhaḥ surānando govindo govidāṁ patiḥ || 20||*